# अथ श्रीमद् गणेश कवच स्तोत्रम् (प्रथमम्)

।। श्री गणेशाय नमः ।। (कुट्टनं)

गौर्युवाच एषोऽति चपलो दैत्या न्बाल्येऽपि नाशयत्य हो ।।
अग्रे किं कर्म कर्तेति न जाने मुनिसत्तम ।।१।।

दैत्या नानाविधा दुष्टाः साधुदेव द्रुहः खलाः ।।
अतोऽस्य कण्ठेकिंचित्वं रक्षार्थं बद्धुमर्हसि ।।२।।

अस्य श्रीमद् गणेश कवच स्तोत्र मंत्रस्य
श्री मन्मुदल ऋषि ।। अनुष्टुप छंदः ।। श्रीमद् गणेशो देवता ।।
श्रीमद् गणेश प्रीत्यर्थं (जपादौ / पूजादौ) पाठे विनियोगः मुनिरुवाच
अथध्यानम् ।।

ध्याये त्सिंहगतं विनायक ममुं दिग्बाहु माद्ये युगे ।।
त्रेतायां तु मयूर वाहन ममुं षडबाहुकं सिद्धिदं ।।

द्वापारे तु गजाननं युगभुजं रक्तांग रागं विभुम् ।।
तूर्ये तु द्विभुजं सितांग रुचिरं सर्वार्थ दं सर्वदाः ।।१।।

विनायकः शिखां पातु परमात्मा परात्परः ।।
अतिसुंदर कायस्तु मस्तकं सुमहोत्कटः ।।१।।

ललाटं काश्यपः पातु भृयुगं तु महोदरः ।।
नयने भालचन्द्रस्तु गजास्य स्त्वोष्ठ पल्लवौ ।।२।।

जिह्वां पातु गणक्रीड श्चिबुकं गिरिजासुतः ।।
वाचं विनायकः पातु दन्तान् रक्षतु दुर्मुखः ।।३।।

श्रवणौ पाशपाणिस्तु नासिकां चिंतितार्थदः ।।
गणेशस्तु मुखं कण्ठं पातु देवो गणंजयः ।।४।।

स्कन्धौ पातु गजस्कन्धः स्तनौ विघ्नविनाशनः ।।
हृदयं गणनाथस्तु हेरम्बो जठरं महान् ।।५।।

धराधरः पातु पार्श्वौ पृष्ठं विघ्नहरः शुभं ।।
लिंगं गुह्यं सदा पातु वक्रतुण्डो महाबलः ।।६।।

गणक्रीडो जानुजंघे ऊरु मंगलमूर्तिमान् ।।
एकदन्तो महाबुद्धिः पादौ गुल्फौ सदाऽवतु ।।७।।

क्षिप्र प्रसादनो बाहू पाणी आशाप्रपूरकः ।।
अंगुलीश्च नखान्पातु पद्महस्तोऽ रिनाशनः ।।८।।

सर्वांगानि मयूरेशो विश्वव्यापी सदाऽवतु ।।
अनुक्तमपि यत्स्थानं धूम्रकेतुः सदाऽवतु ।।९।।

आमोदस्त्वग्रतः पातु प्रमोदः पृष्ठतोऽवतु ।।
प्राच्यां रक्षतु बुद्धीश आग्नेय्यां सिद्धिदायकः ।।१०।।

दक्षिणस्यामुमापुत्रो नैऋत्यां तु गणेश्वरः ।।
प्रतीच्यां विघ्नहर्ताऽ व्यां द्वायव्यां गजकर्णकः ।।११।।

कौबेर्यां निधिपः पायाद् ईशान्यामीशनन्दनः ।।
दिवाव्या देकदन्तस्तु रात्रौ संध्यासु विघ्नहृत ।।१२।।

राक्षसा ऽ सुर वेताल ग्रहभूत पिशाचतः ।।
पाशांकुश धरः पातु रजः सत्वं-तमः स्मृतिम् ।।१३।।

ज्ञानं धर्मं च लक्ष्मीं च लज्जां कीर्तिं दयां कुलं ।।
वपुर्धनं च धान्यं च गृहं दारान्सुतान् सखीन् ।।१४।।

सर्वायुध धरः पौत्रा न्मयूरशो ऽ वतात्सदा ।।
कपिलो ऽ जाविकं पातु गवाश्वं विकटोऽवतु ।।१५।।

(इति) भूर्जपत्रे लिखित्वेदं यः कण्ठे धारये त्सुधीः ।।
न भयं जायते तस्य यक्षरक्षः पिशाचतः ।।१६।।

त्रिसंध्यं जपते यस्तु वज्रसार तनुर्भवेत् ।।
यात्रा काले पठेद्यस्तु निर्विघ्नेन फलं लभेत् ।।१७।।

युद्धकाले पठेद्यस्तु विजयं प्राप्नुयात् ध्रुवम् ।।
मारणो च्चाटना कर्ष स्तम्भ मोहन कर्मणि ।।१८।।

सप्तवारं पठेद्यस्तु दिनानामेक विंशतिम् ।।
तत्तत्फलमवाप्नोति साधको नात्रसंशयः ।।१९।।

एकविंशति वारं च पठे त्तावद् दिनानि यः ।।
कारागृह गतं सद्यो राज्ञा वध्यंच मोचयेत् ।।२०।।

राजदर्शन वेलायां पठेदेतत् त्रिवारतः ।।
स राजनं वशं नीत्वा प्रकृतीश्च सभां जयेत् ।।२१।।

इदं गणेशकवचं मुग्दलेन समीरितं ।।
कश्यपाय च तेनाथ मांडव्याय महर्षये ।।२२।।

मह्यं स प्राह कृपया कवचं सर्वसिद्धिदं ।।
न देयं भक्तिहीनाय देयं श्रद्धावते शुभम् ।।२३।।

सर्व रक्षाकरं सर्वमनः कामप्रपूरकं ।।
अनेनास्य कृता रक्षा न बाधाऽस्यभवेत् क्वचित् ।।२४।।

राक्षसाऽ सुर वेताल दैत्य दानव सम्भवा ।।
।। इति श्री मदादि श्री मन्महा गाणेश महापुराणोक्तं श्री गणेशकवचं समाप्तम् ।।
।। श्रीमद् गणेशार्पणमस्तु ।।

***